✧˖⋯°*❋ ❋*°⋯˖✧

# श्री रुद्राष्टकम्
# (Shri Rudrashtakam)

In Bangla

✧˖⋯°*❋ ❋*°⋯˖✧

# রুদ্রাষ্টকম্

নমামীশমীশান নির্বাণরূপং
বিভুং ব্যাপকং ব্রহ্মবেদস্বরূপম্ ।
নিজং নির্গুণং নির্বিকল্পং নিরীহং
চিদাকাশমাকাশবাসং ভজেঽহম্ ॥ 1 ॥

নিরাকারমোংকারমূলং তুরীযং
গিরাজ্ঞানগোতীতমীশং গিরীশম্ ।
করালং মহাকালকালং কৃপালুং
গুণাগারসংসারপারং নতোঽহম্ ॥ 2 ॥

তুষারাদ্রিসংকাশগৌরং গভীরং
মনোভূতকোটিপ্রভাসী শরীরম্ ।
স্ফুরন্মৌলিকল্লোলিনী চারুগংগা
লসদ্ভালবালেংদু কংঠে ভুজংগম্ ॥ 3 ॥

চলত্কুংডলং শুভ্রনেত্রং বিশালং
প্রসন্নাননং নীলকংঠং দযালুম্ ।
মৃগাধীশচর্মাংবরং মুংডমালং
প্রিযং শংকরং সর্বনাথং ভজামি ॥ 4 ॥

প্রচংডং প্রকৃষ্টং প্রগল্ভং পরেশং
অখংডং ভজে ভানুকোটিপ্রকাশম্ ।
ত্রযীশূলনির্মূলনং শূলপাণিং
ভজেঽহং ভবানীপতিং ভাবগম্যম্ ॥ 5 ॥

কলাতীতকল্যাণকল্পাংতকারী
সদাসজ্জনানংদদাতা পুরারী ।
চিদানংদসংদোহমোহাপহারী
প্রসীদ প্রসীদ প্রভো মন্মথারী ॥ 6 ॥

ন যাবদুমানাথপাদারবিংদং
ভজংতীহ লোকে পরে বা নরাণাম্ ।
ন তাবত্সুখং শাংতি সংতাপনাশং
প্রসীদ প্রভো সর্বভূতাধিবাসম্ ॥ 7 ॥

ন জানামি যোগং জপং নৈব পূজাং
নতোঽহং সদা সর্বদা দেব তুভ্যম্ ।
জরাজন্মদুঃখৌঘতাতপ্যমানং
প্রভো পাহি শাপান্নমামীশ শংভো ॥ 8 ॥

রুদ্রাষ্টকমিদং প্রোক্তং বিপ্রেণ হরতুষ্টয়ে ।
যে পঠংতি নরা ভক্ত্যা তেষাং শংভুঃ প্রসীদতি ॥ 9 ॥

**॥ ইতি শ্রীরামচরিতমানসে উত্তরকাংডে**
**শ্রীগোস্বামিতুলসীদাসকৃতং**
**শ্রীরুদ্রাষ্টকং সংপূর্ণম্ ॥**

✧˖·····°*❋ ❋*°·····˖✧